# श्रीमद्भागवत रसिक कुटुंब

## ॥ जगन्नाथप्रणामः ॥

नीलाचलनिवासाय, नित्याय परमात्मने ।
बलभद्रसुभद्राभ्यां(ञ्), जगन्नाथाय ते नमः ॥ 1 ॥
जगदानन्दकन्दाय, प्रणतार्तहराय च ।
नीलाचलनिवासाय, जगन्नाथाय ते नमः ॥ 2 ॥

## ॥ श्री जगन्नाथ प्रार्थना ॥

रत्नाकरस्तव गृहं(ङ्) गृहिणी च पद्मा
किं(न्) देयमस्ति भवते पुरुषोत्तमाय ।
आभीरवामनयनाहृतमानसाय
दत्तं मनो यदुपते त्वरितं(ङ्) ग्रहाण ॥ 1 ॥

भक्तानामभयप्रदो यदि भवेत् किन्तद्विचित्रं प्रभो,
कीटोऽपि स्वजनस्य रक्षणविधावेकान्तमुद्वेजितः ।
ये युष्मच्चरणारविन्दविमुखा स्वप्नेऽपि नालोचकास्-
तेषामुद्धरण-क्षमो यदि भवेत् कारुण्यसिन्धुस्तदा ॥ 2 ॥

अनाथस्य जगन्नाथ, नाथस्त्वं मे न संशयः ।
यस्य नाथो जगन्नाथस्- तस्य दुःखं(ङ्) कथं प्रभो ॥ 3 ॥

या त्वरा द्रौपदीत्राणे, या त्वरा गजमोक्षणे ।
मय्यार्ते करुणामूर्ते, सा त्वरा क्व गता हरे ॥ 4॥

मत्समो पातकी नास्ति, त्वत्समो नास्ति पापहा ।
इति विज्ञाय देवेश, यथायोग्यं(न्) तथा कुरु ॥ 5॥

## श्री जगन्नाथसप्तकम्

प्रकाशकान्तचिन्मयं प्रसन्नदारुविग्रहं,
प्रफुल्लफुल्लसुन्दरं पुरीप्रमोदमन्दिरम् ।
विषाणुसङ्घशोषिणं(वँ) विशालवैद्यघोषिनं,
सहास्यगोललोचनं महाप्रभुं भजाम्यहम् ॥ 1॥

परम्पराविमण्डितं(न्) तटे वटे मठे रतं,
महाप्रसादमज्जितं महानुभावसज्जितम् ।
सुवर्णकीर्णनिर्जितं समन्दमन्दहासितं,
पहण्डिनृत्यपण्डितं(ञ्) जगद्गुरुं भजाम्यहम् ॥ 2॥

त्रितापपापनाशकं(न्) त्रिधातुदोषघातकं,
सुपञ्चभूतशोधकं(वँ) विषाणुवेगरोधकम् ।
नितान्तशान्तिदायकं महार्तिनाशकारकं,
सदा जगत्सुरक्षकं महाप्रभुं भजाम्यहम् ॥ 3॥

रथे कदापि सत्वरं(वँ) विचित्रवीर्यमीश्वरं,
मुखारविन्दसुन्दरं सगद्गदं सुधारसम् ।

महापुराणसत्करं महेश्वरीपुरःसरं
सघोषहर्षतत्परं सदाशिवं भजाम्यहम् ॥ 4॥

निवासनीलपर्वतं प्रफुल्लपीतसत्पटं,
समस्तवैष्णवाश्रितं समुद्रकूलनिर्जितम् ।
नितान्तशान्तचिद्घनं(ङ्) घनाघनप्रभायुतं(न्),
नियन्तृरोगभौतिकं भिषग्वरं भजाम्यहम् ॥ 5॥

ग्रहेशदर्पहारिणं(ङ्) खगेशयानचारिणं(न्),
नृशंस-कंसमर्दनं समस्तगोपशासनम् ।
सरागराधिकाधवं(ङ्) कृपालुनीलमाधवं(न्),
नवीनयौवनोज्वलं भजे निचोलमुज्ज्वलम् ॥ 6॥

नियोगभोगभक्षणं(वँ) वियोगवेगमर्षणं,
सुपुष्पहारधारिणं(ञ्) चराचरस्य पारिणम् ।
समन्त्रतन्त्रनायकं प्रवीणवेणुवादकं(वँ),
विषाणुमुक्तिदायकं भजे सुखप्रदायकम् ॥ 7॥
इति प्रदीप्तनन्दशर्मविरचितं श्रीजगन्नाथसप्तकं सम्पूर्णम् ।

## श्रीजगन्नाथनवकम्

पारावारपतिः पुरीपुरपतिस्सौभाग्यलक्ष्मीपतिः
श्रीक्षेत्राधिपतिर्महेश्वरपतिर्मायापतिर्भूपतिः ।
श्रीवैकुण्ठपतिर्जगज्जनपतिर्माधुर्यलीलापतिः
दारुब्रह्मपतिर्महामखपतिः कुर्यात्सदा मङ्गलम् ॥ 1॥

हे नारायण हे जगज्जयकृते, हे विश्वबन्धो प्रभो,
हे वैकुण्ठसनातन ग्रहपते हे रामनारायण ।
हे नीलाचलनायक प्रवण हे हे श्रीजगन्नाथ मां,
हे राधाधव पाहि पाहि सततं(वँ) वन्दामि नन्दात्मजम् ॥ 2॥

गोलाकाराक्षयुक्ता निखिलमणिमयी हेमभूषाङ्गशोभा,
श्यामा कामाभिरामा स्वजनसहरता प्रेमधारावहन्ती ।
या सा संसारसारा श्रितजनविषया ब्रह्मरूपा प्रसन्ना
पायात्संभ्रान्तनीलाचलभुवनसुखा स्रग्धरा दारुमूर्तिः ॥ 3॥

स्वर्णालंकृतदिव्यदारुरसिकं श्रीमन्दिराधीश्वरं(वँ),
विश्वानन्दतनुं(वँ) विकाररहितं पुर्य्यां महासौरभम् ।
भक्तिप्रेमधनं(न्) ददाति परमं(लँ) लावण्यलक्ष्मीजुषं
श्रीनीलाद्रिमहोदयं प्रतिदिनं सौन्दर्यसारं भजे ॥ 4॥

पक्षीन्द्रासीनमञ्चं सकलमणियुतं(यँ) योगमायासमेतं
शङ्खं(ञ्) चक्रं(ङ्) गदाब्जं प्रबलबलयुतं बाहुभिः(स्) संदधानम् ।
लावण्यं मर्त्यलोके नयनसुखकरं पीतपट्टाम्बराढ्यं(लँ)
लक्ष्मीनारायणाख्यं(न्) निरुपमयुगलं(न्) दिव्यदेहं(न्) नमामि ॥ 5॥

माधुर्यसाररससारसुखैकसारं(वँ),
वेदान्तसारसुरसारविदग्धसारम् ।
पीयूषसारघनसारसुशीतसारं,
श्रीक्षेत्रसारहरिसारसुसारमीडे ॥ 6॥

शुद्धं बुद्धमबद्धमव्ययमजं(न्) दान्तं प्रशान्तं महः,
कान्तं सन्ततमन्तकारिमनघोदन्तं महान्तं परम् ।
नित्यं(न्) निर्मलमेकमाद्यमजडं सत्यावबोधात्मकं(वँ),
वन्दे तं(ङ्) कमलापतिं प्रतिदिनं(न्) नीलाद्रिचूडामणिम् ॥ 7॥

हे शीतल प्रियहरे करुणावतार,
सौभाग्यदारुसुखकारुकलाभितप्त ।
श्रीमन्दिरेश नितरां(न्) तुलसीदलेऽस्मिन्,
पत्रं(लँ) लिखामि पठ माधव पक्षिपत्र ॥ 8॥

योगे न भोगसकलेषु सुखेषु नित्यं(न्),
त्वन्नामधामविषये क्वचिदस्ति दृष्टिः ।
ब्रह्माण्डनाथ तव गौरवसौरभाय,
चेष्टा कदा भवति सा भविता सुबुद्धिः ॥ 9॥

## नन्दिघोषरथः

नन्दिघोषो महाप्राज्ञो, जगन्नाथस्य स्यन्दनः ।
पञ्चाङ्गुलोत्तरोदीर्घस्- त्रयस्त्रिंशद्भुजः(स्) स्मृतः ॥ 1॥

द्वात्रिंशदधिकैरष्ट- शतैश्च काष्ठखण्डकैः।
निर्मितोऽयं रथः(फ्) पीठः(ख्), कनकमञ्चनामकः ॥ 2॥

सारथिर्दारुकश्चैव, शङ्खचक्रे रथायुधे ।
जय-विजयरूपौ तौ, द्वारपालौ मनोहरौ ॥ 3॥

षोडशसिद्धिचक्राणि, पीतलोहितसुन्दरः ।
शङ्खचूडोरगो रज्जुः(श्), शङ्खचक्रबलाहकः ।
हरिदश्वाश्च घोटकाश्- श्वेतवर्णास्सुशोभनाः ॥ 4॥

रक्षको गरुडस्तत्र, ध्वजस्त्रैलोक्यमोहनः।
विश्वकर्माऽस्य शिल्पी स्यान्- नवाः(स्) स्युः(फ्) पार्श्वदेवताः ॥ 5॥

लक्ष्मीं संवरयन्दरं विदलयंस्- तापं महाखण्डयन्
भक्तानाकलयन्सुखं च रसयन्- सम्पालयन्सत्वरम् ।
यात्रां संवरयन्पहण्डिविलसन्- मास्वादयन्गुण्डिचां,
सम्पश्यन्जगदीश्वरो विलयते, श्रीनन्दिघोषोपरि ॥ 6॥

गच्छन्तं रथनन्दिघोषसहितं प्रस्वादयन्तं मधुं,
सिञ्चन्तं सुखशीतलं(ञ्) जलधरं, प्रक्षालयन्तं मुखम् ।
गुञ्जन्तं(ञ्) जयकारकं(न्) ध्वनिगुणं(न्) धिक्कारयन्तं शठं(न्),
नन्दन्तं(ञ्) जनमानसं हरिवरं(वँ) विभ्राजयन्तं भजे ॥ 7॥

इति नन्दिघोषरथः सम्पूर्णः ।

